International Journal of Sanskrit Research 2017; 3(6): 99-101

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(6): 99-101
© 2017 IJSR
www.anantaajournal.com
Received: 17-09-2017
Accepted: 18-10-2017

**डॉ. जयप्रकाश द्विवेदी**
व्याख्याता–सामवेद,
श्रीमती लाडदेवीशर्मापंचोली,
संस्कृत महाविद्यालय बरुन्दनी,
जिला – भीलवाड़ा, राजस्थान,
भारत

**Correspondence**
**डॉ. जयप्रकाश द्विवेदी**
व्याख्याता–सामवेद,
श्रीमती लाडदेवीशर्मापंचोली,
संस्कृत महाविद्यालय बरुन्दनी,
जिला – भीलवाड़ा, राजस्थान,
भारत

# नारदीयशिक्षानुसारं स्वरमण्डल स्वरूपम् एवं तान राग मूर्च्छनादि विचारम् सप्तस्वरमण्डलस्वरूपम्

**डॉ. जयप्रकाश द्विवेदी**

**प्रस्तावना**
नारदीयशिक्षायां स्वरमण्डलस्वरूपं विशिष्टतया प्रतिपादितम् अस्यां शिक्षायां स्वर स्वरूपान् एवं वर्णितम् ।षड्जादयः स्वराः सप्तप्रकारकाः सामवेदगायनपरम्परायामस्ति। तथा स्वरसमूहविशेषरूपाः षड्ज–मध्यम–गान्धार ग्रामास् त्रयः। एवन्च नन्द्यादयः स्वरग्रामाश्रित स्वरारोहावरोह विशेषरूपा मूर्च्छनाश्च एकविंशतिः वरशैथिल्यपीडनान्यतर कृतसामोत्तरान्यतरस्वर समतापादनरूपाः स्वरप्रयोग विशेषात्मानस् ताना एकोन पंचाशत् इत्येतत्स्वरमण्डलं सामवेदगान संहितायामाहुः। (1)
तेषड्जादयःस्वराः क्रमशः षड्जः–ऋषभः गान्धारः–मध्यमः–पंचमः–धैवतः–निषादश्चेति सप्तस्वराः पठ्यन्त। (2)

**ग्राम विचारः** नारदीयशिक्षानुसारं त्रयः ग्रामाः भवन्ति तेषां नाम्नाः इत्यमुल्लेखिताः प्राप्ताः। षड्जग्रामः–मध्यमग्रामः–गान्धारग्रामाश्चेति। (3)
एषांग्रामानामुत्पत्तिरस्थानं नारदीयशिक्षायांमेवं क्रियंते।

**षड्जादिस्वरोत्पत्ति विचारः** षड्जस्वरानुसारी स्वरसमूह विशेषरूपः षड्जग्रामः पृथिवीलोकाज्जायत, मध्यमस्वरानुसारी स्वरसमूह विशेषरूपो मध्यमग्रामः अन्तरिक्ष लोकाज्जायते। तन्मध्ये गान्धारस्वरानुसारी स्वरसमूह विशेषरूपो गान्धारग्रामः स्वर्गाद् अन्यत्र न जायते। (4)
महर्षिनारदानुसारं षड्जादिस्वरानामंतर्भूते ग्रामरागाः (दीप्ता आयता इत्यादि विशिष्टरागाः उत्पद्यन्ते, अतः सप्तस्वरादन्यस्वराः इत्यसामन्तर्भूताः। (5) तानविचारः– षड्जादिग्रामेषु तानसंख्याःक्रियंते मध्यमग्रामे विंशतिः, षड्जग्रामेचतुर्दशः, एवं गान्धारग्राममाश्रितान् पंचदशतानान् इच्छन्ति। (6)

1. सप्तस्वराः त्रयो ग्रामा मूर्च्छनास् त्वेकविंशतिः। ताना एकोनपंचाशदित्येतत्स्वरमण्डलम्।।(ना.शि. 1/2/4)
2. षड्जश्चऋषभश्चैव गान्धारोमध्यमस्तथा। पंचमो धैवतश्चैव निषादः सप्तमः स्वरः (ना.शि. 1/2/5)
3. षड्ज– मध्यम– गान्धारास् त्रयो ग्रामाः प्रकीर्तिताः।। (ना.शिक्षायाम् 1/2)
4. भूर्लोकाज् जायतेषड्जो भुवर्लोकाच्च मध्यमः। स्वर्गान् नोन्यत्र गान्धारो नारदस्य मतं यथा।। (ना.शि. 1/2/6)
5. स्वर राग विशेषेण ग्रामराग इति स्मृताः।। (ना.शि. 1/2/7)
6. विशंतिंमध्यमग्रामे षड्जग्रामे चतुर्दश। तानान् पंचदशेच्छन्ति गान्धारग्राममाश्रितान्।।(ना.शि. 1/2/8)

**सप्तमूर्च्छनाविचारम्**
**देवमूर्च्छनाः** नारदीयशिक्षायां देवानां सप्तमूर्च्छना वर्णिता, महर्षिनारदानुसारं नन्दी–विशाला–सुमुखी–चित्रा–चित्रवती–सुखा–वलाश्च देवानां सप्तमूर्च्छना वैदिक संगीत शास्त्रे विहिताः। (1)
भरतनाट्यशास्त्रे एषां देवानांमूर्च्छनाविषया किमपि न वर्णिता। परन्तु शार्ंगदेवकृत् संगीतरत्नाकारे प्रतिपादितं। (2)
एवंच तन्मते नन्दादयोमूर्च्छनागान्धारग्रामे एव स्थिता वेदितव्याः।नारदीयशिक्षायां या 'नन्दी'सा संगीतरत्नाकारग्रन्थे ''नन्दा'' या''चित्रवती'' सा'' चित्रावती''या''बला''सा ''अलापा''इति पाठ्भ्रंषदिमूलको नामभेदोवगन्तव्यः।

**पितृमूर्च्छनाः** देवानांसप्तमूर्च्छना यथा भवति तथैव पितृणांचसप्तमूर्च्छना नारदीयशिक्षायां कृतम।आप्यायनी–विश्वभृता–चन्द्रा–हेमा–कपर्दिनी–मैत्री–वार्हती च सप्तमूर्च्छना पितृणां कृते भवन्ति। (3)

पुनः शार्गदेवः संगीतरत्नाकरग्रन्थे पितृणांसप्तमूर्च्छना गायति। तत्र नारदीयशिक्षाया ''विश्वभृता '' इत्यस्य स्थाने ''विश्वहता'' तथा ''वार्हती'' इत्यस्यस्थाने ''चान्द्रमती'' इति च शब्दो अवधेयः । (4)

1. नन्दीविशाला सुमुखी चित्राचित्रवती सुखा। बला या चोथ विज्ञया देवानां सप्तमूर्छनाः।।(ना. शि. 1/2/9)
2. नन्दा विशाला सुमुखी चित्रा चित्रावती सुखा। आलापा चेति गान्धारग्रामे स्युः सप्तमूर्छनाः।।ताश्च स्वर्गे प्रयोक्तव्या विशेषात् तेन नोदिताः।(संगीतरत्नाकरे 1/4/26)
3. आप्यायनी विश्वभृता चन्द्रा हेमा कपर्दिनी। मैत्री च वार्हती चैव पितृणां सप्तमूर्छनाः।।(ना.शि. 1/2/10)
4. आप्यायनी विश्वभृता चन्द्रा हेमा कपर्दिनी। मैत्री चान्द्रमति पित्र्या मध्यमे मूर्छना इमाः।। (श्शार्गदेवकृत संगीतरत्नाकरे1/4/24)

**ऋषिमूर्च्छनाः** पितृणामनुसारमृषीणां च सप्तमूर्च्छना नारदीयशिक्षायां पठ्यन्ते।मूर्च्छनाया आद्येस्वरे षड्जाख्ये सति सा मूर्छना उत्तरमन्द्राख्या स्यात्, मूर्च्छानाया आद्येस्वरे ऋषभाख्ये सति सा मूर्च्छना अभिरूद्गताख्यास्यात्, मूर्च्छनाया आद्येस्वरे गान्धाराख्ये सति सा मूर्च्छना अस्वक्रान्ताख्या तृतीयामूर्च्छना स्मृता, मूर्च्छनाया आद्येस्वरे मध्यमाख्ये सति सा मूर्च्छना सौवीराख्या स्मृता, मूर्च्छनाया आद्येपंचमे स्वरेसति सा मूर्च्छना हृष्यकाख्या स्मृता मूर्च्छनाया आद्येस्वरे धैवताख्ये सति सा मूर्च्छना उत्तरायताख्या वेदितव्या, मूर्छनाया आद्येस्वरे निषादे सति सा मूर्छना रजनीनाम्नी विज्ञेयाः, एवं वशिष्ठादीनामृषीणां सप्तमूर्छनाः भवन्ति। (1)

शार्गदेवः तु संगीतरत्नाकरे नारदीयशिक्षाया एवोनुगमनंकृत्वा षड्जग्रामे ऋषीणां सप्त मूर्छनाः प्रतिपादिताश्च।(2)

1. षड्जे तूत्तरमन्द्रा स्यादृषभे चोभिरूद्गता।अश्वक्रान्ता तु गान्धारे तृतीया मूर्छना स्मृता।। मध्यमे खलु सौवीरा हृष्यका पंचमे स्वरे। धैवते चोपि विज्ञेया मूर्छना तूत्तरायता।। निषादे रजनीविद्यात्ऋषीणां सप्तमूर्छनाः(ना.शि. 1/2/12)
2. यक्ष– रक्षो नारदा `ब्जभव– नागोश्वि–पाशिनः। षड्जग्रामे मूर्छनानामेताः स्युर्देवताः क्रमात्।। तासामन्यानि नामानि नारदो मुनिरब्रवीत्।मूर्छनोत्तर वणीद्या षड्जग्रामे `भिरूद्गता।।अश्वक्रान्ता च सौवीरी हृष्स्यका चोत्तरायता। रजनीति समाख्याता ऋषीणां सप्तमूर्छनाः।।(शार्गदेवकृत् संगीतरत्नाकरे 1/4/21–23)

**नारदीयशिक्षानुसारं–रागविमर्श**

सामगायनशास्त्रे नारदीयशिक्षानुसारं सप्तरागाः भवन्ति। ते क्रमशः षाडवमध्यमरागः–षाड्वपंचमरागः–मध्यमग्रामरागः–षड्जग्रामरागः–साध ारितरागः– कैशिकमध्यमरागः–कैशिकरागाश्च।

**(क) षाडवमध्यमरागः** यस्मिन् मध्यमरागे ऋषभस्वरोद्गतः षड्जप्रतिहतो धैवत स्वरयुक्तः पंचमः स्वरो निपततितं निषादवन्तं रागं षाड्वमध्यमरागं विजानीयात्।(1)

**(ख) षाडवपंचमरागः** मध्यमरागे यदि पंचंमः स्वरो विरामे प्रयुक्तो भवति, गान्धारस्वरः अन्तरस्वरो भवति, निषादास्वरेण सहित ऋषभः स्वरश्च प्रयुक्तोस्ति तर्हि तं पचंमरागं च षाडवं ज्ञायते। (2)

**(ग) मध्यमग्रामरागः** यस्मिन् राग विशेषे गान्धारस्वरस्य आधिक्येन प्रयोगो भवति, निषादस्वरस्य पुनः पुनः प्रयोगो भवति धैवतस्वरस्य दुर्बलरूपेण सकृतदेवोच्चारणेन प्रयोगो भवति स राग विशेषो मध्यमग्रामराग इत्युच्यते। (3)

**(घ) षड्जग्रामरागः** यस्मिन् रागविशेषस्थले निषादस्वरस्तु ईषदेवोच्चारितो भवेत् गान्धारस्वरश्च प्रभूतो भवेत्, धैवतस्वरो वारंवारमुच्चारितो वारंवारं छिन्नश्च भवेत् तं रागविशेषं षड्जग्राम रागं कथ्यते। (4)

1. ऋषभोत्थितषडजयहतो धैवतसहितश्च पंचमो यत्र। निपतति मध्यमग्रामे तं निषादंषाडवं विद्यात्।।(ना.शि. 1/4/5)
2. यदि पंचमो विरमते गान्धारश्चान्तरस्वरो भवति । ऋषभो निषाद सहितस् तं पंचम मीदृशं विद्यात्।।(ना. शि. 1/4/6)
3. गान्धारस्याधिपत्येन निषादस्य गतागतैः। धैवतस्य च दौर्बल्यान् मध्यमग्राम उच्यते।।(ना. शि. 1/4/7)
4. ईषत्स्पृष्टो निषादस्तु गान्धारस् चाधिको भवेत्।धैवतः कम्पितो यत्र षड्जग्रामं तु निर्दिशेत्।।(ना. शि. 1/4/8)

**(ङ) साधारितरागः** यस्मिन् रागविशेषे अन्तर्स्वरसंज्ञक चतुश्रुतिकगान्धारस्वर युक्ता सूक्ष्मस्वरान्तररूपचतुश्रुतिक निषादस्वररूपा काकलिः प्रयुक्तोपलभ्यते कैशिकाख्यं श्रुत्यपंचितस्वर विशेषरूपसाधारणं तु पंचमस्वरसंस्थमुपलभ्यते तं रागविशेषं साधारितरागं विजानीयात्।(1)

अत्र अन्तरस्वर काकलीस्वर परिचयाय संगीतरत्नाकरस्य विचारं एवं च वर्णितम्।(2)

**(च) कैशिकमध्यमरागः** यस्मात् कैशिकमध्यमरागनामके रागविशेषे सर्वतो निखिलैः षड्जादिभिः स्वरैः कैशिकं स्वरविशेषं योजयित्वा मध्यमस्वरे रागसमाप्तिः क्रियते तस्माद् एष रागविशेषः कैशिकमध्यमरागेन पठ्यते। (3)

**(छ) कैशिकरागः** यस्मिन् रागविशेषे चतुर्श्रुतिको मधुरास्फुटः सूक्ष्मो निषादस्वर विशेष उपलभ्यते प्रमुखत्वं तु पचंमस्वरस्य दृश्यते तं मध्यमग्राम जातं रागविशेषं कश्यपऋषिः कैशिकरागः कथ्यते।(4)

1. अन्तरस्वरसंयुक्ता काकलिर् यत्र दृश्यते। तं तु साधारितं विद्यात् पचंमस्थं तु कैशिकम्।।(ना. शि. 1/4/9)
2. साधारणे त्रिश्रुतिःसादंतरत्वे चतुश्श्रुतिः। गान्धार इति तद् भेदौ द्वौ निशंकेन कीर्तितौ।।<br>श्रुतिद्वयंचेत् षड्जस्य निषादः संश्रयेत् तदा। स काकलीमध्यमस्य गान्धारस् त्वंतरः स्वरः।।(संगीतरत्नाकरे 1/4/18)
3. कैशिकं भावयित्वा तु स्वेरैः सर्वैःसमन्ततः।यस्मात् तु मध्यमे न्यासस्तस्मात् कैशिकमध्यमः।।(ना. शि. 1/4/10)
4. काकलिर् दृश्यते यत्र प्राधान्यं पचंमस्य तु । कश्यपः कैशिकं प्राह मध्यमग्राम संभवम् ।।(ना.शि. 1/4/11)

**षड्जादीनां वर्णविचारः** नारदीयशिक्षायां षड्जादिस्वराणां वर्णः (रंगविशेषः) इत्थंव्याख्यातम्।षड्जः स्वरः कमलपत्रतुल्यं वर्णितम्, ऋषभस्वरः शुकतुल्यम्, गान्धारस्वरः स्वर्णतुल्यम्, मध्यमस्वरः कुन्दपुष्पसादृश्यम, पंचमस्वरः कृष्णवर्णवत्, धैवतस्वरः पीतवर्णम्, तथा च निषादवर्णः तु सर्वमिश्रितवर्णाः पठिताः। (1) षड्जादीनांवर्णविषये माण्डुकीशिक्षायामपि नारदीयशिक्षासादृश्यं क्रमबद्धानुसारं वर्णितम्। (2)

पिंगलछन्दसूत्रेपि षड्जादिस्वरवर्णाः पृथक्संज्ञया निरूपिताः। (3) अग्निपुराणेपि षड्जदिस्वराणां श्वेतादयो वर्णा उक्ताः। (4)

**षड्जादीनां जातिविचारः** ब्राह्मणजात्यान्तर्गते पंचमः, मध्यमः, षड्जाश्च एते त्रयः स्वराः पठ्यन्ते। ऋषभधैवतश्चेति एतौ उभौ अपि स्वरौ क्षत्रियौ स्मृतौ गान्धारःनिषादश्चेति एतौ द्वौ स्वरौ अर्धेन वैश्यौ वै स्मृतौ, अनयोः गान्धार निषादयोः अर्धेन पतितत्वाद् अर्धेन शूद्रत्वंच जानीहिः एतस्मिन्नर्थे सन्देहो न कुर्यात्।(5)

1. पद्मपत्रप्रभःषड्ज ऋषभः शुकपिंजरः।कन्काभस् तु गान्धारो मध्यमः कुन्दसप्रभः ।(1) पंचमस्तु भवेत कृष्णः पीतकं धैवतं विदुः। निषादः सर्ववर्णः स्यादित्येताः स्वरवर्णताः। (2) (ना. शि. 1/4/1–2)
2. पद्मपत्र प्रभः षड्जः ऋषभः शुकपिंजरः।कनकाभस तु गान्धारो मध्यमः कुन्दसप्रभः।। पंचमस्तु भवेत् कृष्णः पीतवर्णस्तु

धैवतः।निषादः सर्ववर्णाभ इत्यते स्वरवर्णकाः।। (माण्डु. शि. 1/13–14)

3. स्वराः षड्जर्षभ ––––––निषादाः। सित–सारंग – पिशंग–कृष्ण–नील–लोहित –गौरावर्णा ः।।(पिंगल छ. सू. 3/64–65)
4. अग्निपुराणे (330/19–21 श्लोके वर्णिताः)
5. पंचमो मध्यमः षड्जः इत्यते ब्राहम्णा स्मृताः।ऋषभो धैवतश्चापीत्येतौ हि क्षत्रियावुभौ।।गान्धारश्च निषादश्च वैश्यावर्धेन वै स्मृतौ। शूद्रत्वं विद्धि चोधैन पतितत्वान् न संशयः।। (ना. शि. 1/4/3–4)

**षड्जादिस्वरोत्पत्तौ – देवानांमहत्वम्**

षड्जादिस्वरोत्पत्तौविषये नारदीयशिक्षायां पठति तद्यथा षड्जःस्वरः अग्निना गीतः, ऋषभः ब्रहम्णा गीतः, गान्धारस्वरः सोमेनगीतः, मध्यमःस्वरः विष्णुना गीतः, पंचमःस्वरस्तु महामनसा नारदेनगीतः, धैवतो निषादश्चेति एतौ द्वौ स्वरो तुम्बुरूणा गन्धर्वेण उच्यन्ते च। एवं प्रकारं नारदमुनिः स्वरोत्पत्तिदेवतानाम्नः प्रतिपादितः।(1)

**षड्जादिस्वरोत्पत्ति–स्थानानि**

षड्जादिस्वरोत्पत्तिस्थानविषये नारदमुनिः कथयति–षड्जाख्यः प्रथमःस्वरःकण्ठात् उत्पद्यते ऋषभाख्यो द्वितीयः स्वरो शिरसोत्पद्यते, गान्धाराख्यस्तुतृतीयस्वरः नासिकानुगतस्थान विशेषेणोच्चर्यते, मध्यमाख्यश्चतुर्थस्वरः वक्षः स्थलाज् जातः, पंचमाख्यः मन्द्रः स्वरो वक्षः स्थलात्शीर्षाद् गलाच्चोत्पन्नः, धैवताख्यंषष्ठस्वरंभालदेशात् उत्पन्नीयम् एव विजानीयात्, निषादाख्यंसप्तस्वरंच सर्वेभ्यः कण्ठादिभ्यः संधिभ्यो जातं विजानीयुः।(2)

षड्जादि सामस्वरोत्पत्तिविषयः कातीये भाषिक सूत्रेपि प्रतिपादितो दृश्यते।तथा हि–''सप्तसाम्नाम् षड्जषर्भ–गान्धार–मध्यम–पंचम–धैवत निषादाः, तेषां योनयः कण्ठात् षड्जः, शिरस् ऋषभः, नासिकाया गान्धारः, उरसो मध्यमः, उरसः शिरसः, कण्ठात् पंचमः, धैवतो ललाटात्, निषादः सर्वत इति।(3)

1. अग्निगीतः स्वरः षड्ज ऋषभो ब्रहम्णोच्यते।सोमेन गीतो गान्धारो विष्णुना मध्यमः स्वरः।पंचमस्तु स्वरो गीतो नारदेन महात्मना।धैवतश्च निषादश्च गीतो तुम्बुरूणा स्वरौ। (ना. शि. 1/5/13–14)
   आद्यस्य दैवतं ब्रहमा–यदादित्योस्य दैवतम्।।(ना.शि. 1/5/15–19)
2. कण्ठादुत्तिष्ठते षड्जः शिरसस् त्वृषभः स्मृतः। गान्धारस् त्वनुनासिक्य उरसो मध्यमः स्वरः।। उरसःशिरसः कण्ठादुथितः पंचमः स्वरः। ललाटाद् धैवतं विद्यान् निषादं सर्वसंधिजम्।। (ना. शि. 1/5/5–6) नासांकण्ठमुरस्–सर्वस्थानानि धार्यते।। (ना. शि. 1/5/7–12)
3. कातीयभाषिकसूत्रे (3/16–25)

**नारदीयशिक्षानुसारं सामस्वररागादिचक्रम्**

